इदं भगवता राजगृहे शिक्षापदं प्रज्ञप्तं षड्वर्षाभिसम्बुद्धेन हेमन्ते पक्षे द्वितीवसे नवमे पश्चाद्भुक्तं पुरस्तान्मुखनिषण्णेन। अर्द्धतीय-पौरुषायां च्छायायामायुष्मन्तं धनिकं कुंभकारजातीयमारभ्य राजानञ्च श्रेणीयं बिम्बसारं पांसुकुलिकं च भिक्षु। इमस्य च शिक्षापदस्य प्रज्ञप्तिर्धर्मो यथा प्रणिहितस्य च या अनुवर्त्तनता अयमुच्यते अनुधर्मो[2]।

3. यो पुनभिक्षुः स्वहस्तं मनुष्य[3]विग्रहं जीविताद् व्यापरोपेय शस्त्रहारकं वास्य पर्येयेय मरणाय चैनं[4] समादापेय मरणवण्णं वास्य संवण्णेय हम्भो पुरु [7B] ष किन्ते इमिना पापकेन दुर्ज्जीवितेन विश्जीवितेन मृतन्ते जीविताच्छ्रेयो इति चित्तमलं चित्तसंकल्पमनेक-पर्यायेण मरणाय चैनं समादापेय मरणवण्णवास्य संवण्णेय सो च पुरुषो तेनोपक्रमेण कालं कुर्यान्नान्येन अयं पि भिक्षूः पाराजिको भवत्यसंवास्यो न लभते भिक्षुहि सार्धसंवासं[5]।

इदं भगवता वेशालीयं शिक्षापदं प्रज्ञप्तं षड्वर्षोऽभिसंम्बुद्धेन हेमन्ते पक्षे तृतीये दिवसे दशमे पश्चाद् भुक्तं पुरस्ताभिमुखानिषण्णेन अर्द्धतृतीयेन पौरुषायांच्छायायां सम्बहुलान गिलानोपस्थापकान् भिक्षूनारभ्य मृगदण्डिकं च परिव्रजकमिमस्य च शिक्षापदस्य प्रज्ञ-प्तिर्द्धर्मो यथा प्रणिहितस्य च या अनुवर्त्तनता अयमुच्यते [8A] अनु-धर्मो।

1—वदेंम् in the Ms.

2—Ms. Reads : अनुधम्मर्मो

3—स्य in the Ms.

4—चेनं in the Ms.

5—Ms. adds वासं superfluously.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

4. यो पुनभिक्षुरनभिजाननुपरिजानन्नात्मोपनायिकमुत्तरि मनुष्य [धर्मं][1] इत् । अयं पि भिक्षूः धर्म्ममलमार्यज्ञानदशनं विशेषाधिशेषाधिगम प्रतिजानेय इति जानामि इति पश्यामीति । सो तदपरेण समयेन समनुग्राहियमाणो, वा अ [स] मनुग्राहियमाणो वा आपन्नो विशुद्धिप्रोक्षो एवमवचि । अजानन्नेवाहमायुष्मन्तो अवचि जानामि । अयं पि पश्या[2]मीति इति तुच्छं मृषाविलापमन्यत्राभिमानात् । अयं पि भिक्षूः पाराजिको भवत्यसंवास्यो न लभते भिक्षूहि सार्द्धसं [वासं] ।

इदं भगवता श्रावस्तीयं शिक्षापदं प्रज्ञप्तं षड्वर्षाभिसंबुद्धेन हेमन्ते पक्षे चतुर्थ्ये दिवसे त्रयोदशमे पूरे भुक्त[3] उत्तरामु [8B] खनिषण्णेन अर्द्धन्थ पौरुषायांच्छायायां सम्बहुलान् ग्रामवासिका भिक्षुनारभ्य आभिमानिकं च भिक्षु इमस्य च शिक्षापदस्य प्रज्ञप्तिर्द्धर्मो यथाप्रणिहितस्य च या अनुवर्त्तनता अयमुच्यते अनुधर्मो ।

उद्यानं ॥ [1] मैथुनं [2] अदिन्नादानं [3] वधो मनुष्यविग्रहं [4] स्यात्कृतेन चोत्तरिमनुष्यधर्म प्रतिजानतीति ॥

उद्दिष्टाः ॥ खो पुनरायुष्मन्तो चत्वारः पाराजिका धर्माः । येषां भिक्षुरितोन्यतरामापत्तिमापद्येत्वा पाराजिको भवत्यसम्वास्यो न लभते हि भिक्षुहि सार्द्धसंवासं । यथापूर्व्वे तथा पश्चाद्यथापश्चात्तथा पूर्व्वे पाराजिको भवत्यसम्वास्यो न लभते भिक्षु हि [सार्द्धं] संवासं । तत्रायुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः । द्विती [9A] यं पि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धास्तृतीयं पि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः परिशुद्धात्रायुष्मन्तो यस्मात्तूष्णीमेव मेतं धारयामि ।

1—Words within [ ] are our additions.

2—Ms. reads पस्यामीति

3—Ms. reads भक्त

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

II.—THE THIRTEEN SAṀGHĀTIŚESĀ DHARMAS.

इमे पुनरायुष्मन्तो त्रयोदश संघातिशेषा धर्मा[1] अन्वर्द्धमासं सूत्रे प्रातिमोक्षे उद्धेशमागच्छन्ति ।

1. संचेतनिका ये शुक्रस्य[2] विशृष्तीये अन्यत्र स्वप्नान्तरें संघातिशेषो ।

2. यो पुनभिक्षु ओतीएणा विपरिणतेन चित्तेन मातृग्रामेण सार्द्धं कायसंसंग्गं समापद्येय संयथीदं हस्तग्रहणं वा वेणीग्रहणम्वा अन्यतरान्यतरस्य वा पुनरङ्गजातस्य प्रामोद्य शपरासोपिणं शादियेय संघातिशेषो ।

3. यो पुनभिक्षु ओतीएणा विपरीतेन चित्तेन मातृग्रामं दुस्थूलाय वाचाय ओभाषेय पापिकाय मैथुनाय सं [9B] वीताय संयथीदं युवां युवां युवतीति संघातिशेषो ।

4. यो पुनभिक्षु ओतीएणो विपरिणतेन चित्तेन मातृग्रामस्य अन्तिके आत्मिकाये परिचर्याये वएणं भाषेय एतदग्रं भगिनि परिचर्याणां या मादृशं श्रमणं शीलवन्तं कल्याणधर्मं ब्रह्मचारिं एतेन धर्मेण उपस्थिहेय परिचरेय यदुत मैथुनोपसंहितेनेति संघातिशेषो ॥

5. यो पुनभिक्षुः संचरित्रं समापद्येय स्त्रियाये[3] वा पुरुषस्योपसंहरेय पुरुष्यस्य वा सतं स्त्रियाये[4] उपसंहरेय जायत्तनेन वा जार्त्तनेन वा अन्तमसतो भिक्षुणि कायामपि संघातिशेषो ॥

6. स्वयं याचिकाय भिक्षुणा कुटी कारापयमाणेन अस्वा[5]मिकात्मोद्देशिकां कुटीकारापयितव्या । तत्रेदं प्रमाणं दी [10A] र्घसो द्वादशवितस्तीयो सुगतवितस्तिना । तिर्यक सप्तान्तरं भिक्षु चानोनाभिनेतव्या वस्तुदेशनाय ते हि भिक्षु हि वस्तु देशयितव्यं । अनारम्भां सपरिक्रमणं

1—Ms. reads धर्म्मा अनुव···

2—Ms. reads शुक्रश्य···

3, 4—Ms. reads इस्त्रियाये

5—Ms. reads श्वा

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

सारम्भे चे भिक्षु वस्तुस्मिन्नपरिक्रमणे[1] स्वयं याचिकाय कुटीं कारापेयं। अस्वामिकामात्मोद्देशिकं भिक्षुस्तानाभिनेय वस्तुदेसनाय। प्रमाणं वा अतिक्रमेय अदेशिते वस्तुस्मिन्नपरिक्रमणे संघातिशेषो।

7. महालकं भिक्षुणा विहारं [कारा] पयमाणेन सस्वामिककात्मोद्देशिकं भिक्षुवानेनाभिनेतव्या वस्तुदेशनाय ते हि भिक्षू हि वस्तु देशयितव्यं। अनारम्भः सपरिक्रमणं सारम्भे चे भिक्षू वस्तुस्मिन्नपरिक्रमणं महल्लकं विहारं कारापेय सस्वामिकमात्मोद्देशिकं भिक्षुन्वा नाभिनेय वस्तुदेशना [10B] य अदेशिते वस्तुस्मिन्नपरिक्रमणे संघातिशेषो।

8. यो पुनभिक्षू भिक्षुस्य दुष्तो दोषात्कुपितो अनात्तमनो शुद्धं भिक्षूमनापतिकममूलकेन पाराजिकेन धर्मेण अनुध्वंसेय अप्पेव नाम इमं भिक्षूं ब्रह्मचर्यातो च्यावेयन्ति। सो तदपरेण समयेन समनुग्राहियमाणो वा असमनुग्राहियमाणो वा अमूलकमेव तमधिकरणं भवति। अमूलकस्य च अधिकरणस्य च अधर्मो उपादिन्नो भवति। भिक्षु च दोषे प्रतिष्ठिहति। दोषादवचामीति संघातिशेषो।

9. यो पुनभिक्षू भिक्षुस्य दुष्तो दोषात्कुपितो अनात्तमनो अन्यभागीयस्याधिकरणस्य किञ्चिदेव लेसामात्रकं धर्ममुपादाय अपराजिकं भिक्षूं पराजिकेण धर्मेण अ [11A] नुध्वंसेय अप्पेव नाम इमं भिक्षुं ब्रह्मचर्यातो च्यावेयन्ति। सो तदपरेण समयेन समनुग्राहियमाणो वा असमनुग्राहियमाणो वा अन्यभागीयमेव तमधिकरणं भवति। अन्यभागीयस्य चाधिकरणस्य केचि [देव] लेसामात्रको धर्मो उपादिन्नो भवति। भिक्षु च दोषे प्रतिष्ठहति दोषादवचामीति संघातिशेषो।

10. यो पुनभिक्षुः समग्रस्य संघस्य भेदाय पराक्रमेय भेदनसम्वर्त्तनीयम्वाऽधिकरणं। समादाय प्रगृह्य तिष्ठेय सो भिक्षु भिक्षुहि एवमस्य वचनीयो मा आयुष्मन् समग्रस्य संघस्य भेदाय पराक्रमेहि। भेदन सम्वर्त्तनीयम्वा अधिकरणं समादाय प्रगृह्य तिष्ठाहि। समेत्त आयुष्मा-

1—याकाय in the Ms.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

न्सार्द्धं संघेन समग्रोहि संघो स [11B] हितो सम्मोदमानो अविवदमानो एकुद्देशो क्षीरोदकी भूतो शास्तुः शासनं दीपयमानो सुखं च फासुञ्च विहरति। एवं च स भिक्षू भिक्षू हि वुच्यमानो तं वस्तुं प्रतिनिस्सरेय इत्येतं कुशलं। सो च प्रतिनिस्सरेय सो भिक्षू भिक्षू हि यावन्तृतीयकं समनुग्राहितव्यो समनुभाषितव्यो तस्य वस्तुस्य प्रतिनिस्सग्गाय यावन्तृतीयकं समनुग्राहियमाणो वा समनुभाषियमाणो वा। तं वस्तुं प्रतिनिस्सरेय इत्येतं कुशलं नो च प्रतिनिस्सरेय तमेव वस्तुसमादाय प्रगृह्य तिष्ठेय संघातिशेषो।

11. तस्य खो पुनभिक्षुस्य भिक्षुसहायका भोन्ति। एको वा द्वौ वा त्रयो वा सम्बहुला वा वगवादका अनुवत्तकाः समनुष्याः [12A] संघभेदाय ते भिक्षू तान्भिक्षूनेवं वदेय्य मा आयुष्मन्तो एतं भिक्षुं किञ्चिद्वदथ। कल्याणं वा पापकम्वा[1]। धर्म्मवादी चैषो भिक्षू विनयवादी चैषो भिक्षू अस्माकं चैषो भिक्षूच्छन्दञ्च रुचिञ्च समादाय प्रगृह्य व्यवहरति। य चैतस्य भिक्षुस्य क्षमते च रोचते च अस्माकमपि तं क्षमते च रोचते च जानन् चैषो भिक्षु भाषते नो अजानन्। ते भिक्षू भिक्षू हि एवमस्य वचनीया मायुष्मन्तो एवं वदथ न एषो भिक्षू धर्मवादी न एषो भिक्षू विनयवादी अधर्मवादी[2] चैषो भिक्षू अविनयवादी चैषो भिक्षू अजानन् चैषो भिक्षू भाषते नो जानन्। मा आयुष्मन्तो संघभेदं रोचेन्त संघसामग्रीमेवायुष्मन्तो रोचन्त। समेन्त आयुष्मन्तो सार्धं संघेन सम [12B] ग्रो हि संघो सहितो सम्मोदमानो अविवदमानो एकुद्देशो क्षीरोदकी भूतो शास्तुः शासनं दीपयमानो सुखं च फासुं च विहरति। एवञ्च ते भिक्षु भिक्षुहि वुच्यमानास्तम्वस्तुं प्रतिनिस्सरेअ[3] इत्येतं कुशलं नो च प्रतिनिस्सरेअ ते भिक्षू भिक्षू हि यावन्तृतीयकं समनुग्राहितव्याः समनुभाषितव्याः। तस्य वस्तुस्य प्रतिनिस्सग्गाय यावन्तृतीयकं समनुग्राहियमाणा वा समनुभाषियमाणा

1—Ms. पापकंम्वा

2—Ms. reads अधर्म्मवादी

3—प्रतिनिस्सरेय another variant form.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

वा तम्वस्तुं प्रतिनिस्सरेअ इतं कुशलं नो च प्रतिनिस्सरेंसु तमेव च वस्तुं समादाय प्रगृह्य तिष्ठेय संघातिशेषो ।

12. भिक्षुः खो पुनदूर्व्वचकजातीयो भोति[2] सो उद्देश-पर्यापन्ने हि शिक्षापदे हि भिक्षु हि शिक्षायां सहधर्मेण सहविनयेन वुच्य [13A] मानो आत्मानमवचनीयं करोति । सो एवमाह । मा मां आयुष्मन्तो किञ्चिद्वदथ कल्याणं वा पापकं वा । अहमप्या-युष्मन्तानां न किञ्चिद् प्रच्छामि । कल्याणं वा पापकं वा विरमन्वा-युष्मन्तो मम वचनाय । सो भिक्षू भिक्षू हि एवमस्य वचनीयो मा आयुष्मन्नुद्देशपर्यापन्ने हि शिक्षापदे हि भिक्षू हि शिक्षायां सहधर्मेण सह विनयेन वुच्यमानो आत्मानमवचनीयं करो हि वचनीयम् वायुष्मानात्मानं करोत्तु भिक्षु पि आयुष्मन्तम्वक्षन्ति शिक्षायां सहधर्मेण सहविन [येन] आयुष्मानपि भिक्षून्वदन्तु शिक्षया सहधर्मेण सहविन-येन । एवं सम्वद्धा खो पुनस्तस्य भगवतो तथागतस्यार्हतः सम्यक् सम्बुद्धस्य यथा यदिदमस्य मन्यस्य वचनीया अन्यो [13B] न्यापत्ति व्युत्थापनीया । एवं च सो भिक्षू भिक्षू हि वुच्यमानो तं वस्तुं प्रति-निस्सरेय इत्येतं कुशलं नो च प्रतिनिस्सरेय सो भिक्षू भिक्षू हि यावन्तृ-तीयकं समनुग्राहितव्यो समनुभाषितव्यो तस्य वस्तुस्य प्रतिनिस्सग्गाय यावन्तृतीयकं समनुग्राहियमाणो वाभिवस्तुं प्रतिनिस्सरेय इत्येतं कुशलं नो च प्रतिनिस्सरेय तमेव वस्तुं समादाय प्रगृह्य तिष्ठेय संघातिशेषो ।

भिक्षु खो पुनरन्यतरं ग्रामम्वा नगरम्वा निगमम्वा उपनिश्राय विहरन्ति। कुलदूषकाः पापसमाचारास्तेषान्ते पापकाः समाचारा दृश्यन्ते च श्रूयन्ते च कुलान्यपि दुष्तानि दृश्यन्ते च श्रूयन्ते च कुलदूषकाश्च पुनर्भवन्ति । पापसमाचाराः ते भिक्षू भिक्षू हि एवमस्य व [14A] चनीयाः। आयुष्मन्तानां खलु पापकाः समाचाराः दृश्यन्ते च श्रूयन्ते च कुलान्यपि दुष्तानि दृश्यन्ते च श्रूयन्ते च । कुलदूषकाश्च पुनरायुष्मन्तः पापसमाचाराः प्रक्रमन्वायुष्मन्तो इमस्मादावासादलम्वा

1—Pali reads होति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

इह वासेनेति[1] । एवं च ते भिक्षू भिक्षू हि वुच्यमानास्ते भिक्षू तान्भिक्षुने वदेअ च्छन्दगामी चायुष्मान्तो संघो दोषगामी चायुष्मन्तो संघो मोहगामी चायुष्मन्तो संघो भयगामी चायुष्मन्तो संघो संघो च ताहि तादृशिकाहि आपत्तीहि । एकत्यान् भिक्षून् प्रव्राजेति एकत्यान्भिक्षून्न प्रव्राजेति ते भिक्षू भिक्षू हि एवंमस्य वचनीयाः । मा आयुष्मन्तो एवं वद न च भिक्षू न संघो च्छन्दगामी । न संघो दोषगामी न संघो मोहगामी । [14B] न संघो भयगामी । न च संघो ताहि तादृशिकाहि आपत्तीहि । एकत्यान्भिक्षून् प्रव्राजेति एकत्यान्भिक्षून्न प्रव्राजेति । आयुष्मन्तानामेव खलमापकः समाचारा दृश्यन्ते च श्रूयन्ते च कुलान्यपि दुष्टानि दृश्यन्ते च श्रूयन्ते च कुलदूषकाश्च पुनरायुष्मन्तः ग्रामसमाचाराः प्रक्रमन्वायुष्मन्तो इमस्मादावासा[2]दलम्वा इह वासेनेति[3] एवं च भिक्षू भिक्षू हि वुच्यमानाभिवस्तुप्रतिनिस्सरेअ इत्येतं कुशलं नो च प्रतिनिस्सरेअ ते भिक्षू भिक्षू हि यावन्तृतीयकं समनुग्राहितव्या समनुभाषितव्यास्तस्य वस्तुस्य प्रतिनिस्सग्गाय यावन्तृतीयकं समनुग्राहियमाणा वा समनुभाषियमाणा वा तं वस्तुं प्रतिनिस्सरेअ इत्येतं कुशलं [15A] नो च प्रतिनिस्सरेअ इमे च वस्तुं समादाय प्रगृह्य तिष्ठेअ संघातिशेषो ॥

॥ उद्दानं ॥ [1] संचेतनिका [2] हस्तग्रहो [3] ओभाषो [4] परिचर्याव्वणनं [5] संचरित्रं [6–7] कुटीविहारोद्वे चा[4] दूतेन संघस्य च [10] भेदायोपक्रामति तस्य [11] चानुवर्त्तकाः [12] दुर्व्वचको [13] कुलदूषकाश्च ॥

॥ उद्दिष्टाः ॥ खो पुनरायुष्मन्तो त्रयोदशसंघातिशेषो धर्मास्तत्र नव प्रथमापत्तिकाश्चत्वारो यावन्तृतीयका येषां भिक्षु अन्यतरामा-

---

1—Ms. reads वुत्थेन

2—Ms. reads दलंम्वा

3—Ms. reads वुत्थेन

4—After Rule 7 in the Uddānaṁ Nos. 8 [अमूलकं] and 9 [लेशिकं] are missing in the Ms.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

पत्तिमापतित्वा यावन्तकं जानन् [प्रति] च्छादेति तावन्तकं तेन भिक्षुणा अकामपरिवासं परिवसितव्यं। परिवुत्थ परिवासेन भिक्षुणा उत्तरिं षडाहं भिक्षुसंघे मानत्वं चरितव्यं। चिण्णमानत्वे भिक्षूः कुतानुधर्मो आहूयन प्रतिवद्येय अस्या [15B] विंशतिगणो[1] भिक्षू संघो तत्र सो भिक्षू आध्रेयितव्यो। एक भिक्षुणापि वोदूनो विंशतिगणो भिक्षुसंघो तं भिक्षुमाध्रेय सो च भिक्षू अनाभृतो ते च भिक्षू गार्ह्याः इयमत्र सामीची।

तत्रायुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः द्वितीयं पि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः तृतीयमपि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः परिशुद्धा अत्रायुष्मन्तो यस्मात्तूष्णी-मेवमेतं धारयामि।

III. THE TWO ANIYATA DHARMAS

इमे खो पुनरायुष्मन्तो दुवे अनियता धर्मा अन्वर्द्धमासं सूत्रे प्रातिमोक्षे उद्देशमागच्छन्ति।

1. यो पुनभिक्षु मातुग्रामेण सार्द्धं प्रतिच्छन्नासने अलङ्कर्मणीये एकोयरहो निषद्यां कल्पेय तमेनं श्रद्धेय वचसा उपासिका दृष्ट्वा त्रयाणां धर्माणां मन्यतरान्यतरेण धर्मेण वादेय पाराजि (16A) केन वा संघातिशेषेण वा पाचत्तिकेन वा निषद्यो भिक्षुः प्रतिजानामानो त्रयाणां धर्माणामन्यतरान्यतरेण धर्मेण[1] कारापयितव्यो पाराजिकेन वा संघातिशेषेण वा पाचत्तिकेन वा येन येन वा पुनरस्य श्रद्धेय वचसा उपासिका दृष्ट्वा धर्मेण वदेय तेन सो भिक्षू धर्मेण कारापयितव्यो अयं धर्मो अनियतो।

2. नाहैव खो पुनः प्रतिच्छन्नासनम्भवति। नालंकर्मणीयं अलं खो पुन मातृग्रामं दुस्थूलाय वाचाय ओभाषितुं। पापिकाय मैथुनोप-संहिताय तथारूपेच भिक्षू आसने मातृग्रामेण सार्द्धमेको एकाय

1—Ms. reads द्विंशगणो

2—Ms. adds धर्म्मेण

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

रहो निषद्यां कल्पेय तमेनं श्रद्धेय वचसा उपासिका दृष्ट्वाद्विन्नान्य-मर्माणां मन्यतरान्यतरेण धर्मेण वदेय संघातिशेषेण वा ॥ पाचत्ति [19B] केन वा निषद्यास्भिक्षुः प्रतिजानमानो द्विन्नान्यर्माणामन्यतरा-न्तरेण धर्मेण कारापयितव्यो । संघातिशेषेण वा । पाचत्तिकेन वा । येन येन वा पुनरस्य श्रद्धेय वचसा उपासिका दृष्ट्वा धर्मेण वदेय तेन तेन सो भिक्षू धर्मेण कारापयितव्यो अयं पि धर्मो अनियतो ॥

उद्यानं ॥ [1] प्रतिच्छन्नासनं [2] रहोनिषद्याश्च ॥

उद्दिष्टाः ॥ खो पुनरायुष्मन्तो दुवे अनियता धर्मा स्तत्रा-युष्मन्तो प्रच्छामि कच्चित्थ परिशुद्धाः द्वितीयम्पि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धास्तृतीयम्पि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः परिशुद्धाः अत्रायुष्मन्तो यस्मात्तूष्णीमेवमेतं धारयामि ॥

IV. THE THIRTY NIHSARGIKA PĀCATTIKA DHARMAS.

इमे खो पुनरायुष्मन्तो त्रिंशन्निस्सर्गिक पाचत्तिका धर्मा अन्वर्द्धमासं सूत्रे प्रातिमोक्षे उ [17A] देशमागच्छन्ति ।

1. कृतचीवरे हि भिक्षू हि उद्धृतस्मिन्कठिने दशाहपरमं भिक्षुणा अतिरेकचीवरन्धारयितव्यं । तदुत्तरिन्धारेय निस्सर्गिक पाचत्तिकं ।

2. कृतचीवरे हि भिक्षू हि उद्धृतस्मिन्कठिने एकरात्रं पि चेत्भिक्षु त्रयाणां चीवराणां मन्यतरान्यतरेण विप्रवसेय अन्यत्र संघसम्मुतीये निस्सर्गिक पाचत्तिकम् ॥

3. कृतचीवरे भिक्षु हि उद्धृतस्मिन्कठिने उत्पद्येय भिक्षुस्य अकालचीवरमाकांक्षमाणेन भिक्षुणा प्रतिगृह्णितव्यं प्रतिगृह्णीत्वा क्षिप्र[1] मेव तं चीवरं कारापयितव्यं। कारापयतो च तस्य भिक्षूस्य तं चीवरं न परिपूरेय मास परमन्तेन भिक्षुणा तं चीवरं निक्षिपितव्यं ।

1—Ms. adds भि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

ऊनस्य पारिपूरीये सन्तीये प्रत्याशाये तदुत्तरिन्निक्षिपेये सन्तीये वा अ [17B] सन्तीये वा प्रत्याशाये निस्सर्गिक पाचत्तिकम् ।

4. यो पुनभिक्षूरन्यातिकाये भिक्षुणीये चीवरं प्रतिगृह्णेय अन्यत्र परिवर्त्तकेन निस्सर्गिक पाचत्तिकम् ॥

5. यो पुनभिक्षुरन्यातिकाये भिक्षुणीये पुराणचीवरधोवायेय वा रंजस्येय वा आक्रोथोपेय वा निस्सर्गिक पाचत्तिकम् ।

6. यो पुनभिक्षुरन्यातकं[1] गृहपतिं वा गृहपतिपुत्रं[2] वा चीवरं याचेय अन्यत्रसमये निस्सर्गिक पाचत्तिकम् ॥

तत्रायं समयो[3] अच्छिन्नचीवरो भिक्षू भवति । अयमत्रसमयो ।

7. अच्छिन्नचीवरेण भिक्षुणा क्षमते अन्यातकं गृहपतिम्वा गृहपतिपुत्रं वा चीवरं याचितुं । तमेनमभिभाष्तो सम्मतो संबहुले हि चीवरे हि प्रवारेय तथा प्रवारितेन भिक्षुणा सन्तरोत्तरपरमं चीवरं [18A] सादयितव्यं तदुत्तरिं सादियेय निस्सर्गिक पाचत्तिकम् ॥

8. भिक्षुं खो पुनरुद्दिश्य अन्यतरेषां द्विन्नां गृहिपतिकानां चीवरे चेतापनान्यः अन्यानि उपसंस्कृतानि भवन्ति प्रतिसंचेतयितानि इमे हि वयं चीवरचेतापने हि चीवरं चेतापयित्वा इत्थन्नामं भिक्षुं चीवरेणाच्छादयिष्यामः । तत्र च भिक्षुः पूर्व्वे अप्रवारितो उपसंक्रमित्वा विकल्पमापद्येय साधु खो पुन यूयं मायुष्मन्तो इमे हि चीवरचेतापने हि चीवरं चेतापयित्वा इत्थं नामं भिक्षुं चीवरेणाच्छादेथ । एवंरूपेण च उभौ पि सहितौ एकेन कल्याणकामतामुपादाय प्रतिनिष्पन्ने चीवरे नि[4]सर्गिक पाचत्तिकम् ॥

1—The Sarvastivadin text reads अज्ञातिक 2—The Pali, Sans. Sarvastivādin and Chinese Msg. say that it is गृहपतिपत्नी (householder's wife) 3—The Sarvāstivādin text reads नष्टचीवरेण वा दग्धचीवरेण वारूढचीवरेण वा The Mahiṣaśikas read here only one case—the other time means when his robe is lost.

This text agrees with the Mahiṣaśika version. The Chinese Msg. too agrees with the Mahiṣaśika version.

4—Ms. reads निग्गिक

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

9. भिक्षुं खो पुनरुद्दिश्य अन्यतरेषां द्विन्नां गृहपतिकस्य गृहपति-[18B] नीये च प्रत्येक चीवरचेतापनानि प्रतिसंस्कृतानि भवन्ति प्रतिसंचेतापितानि इमे हि वयं प्रत्येक चीवरचेतापने हि प्रत्येकं प्रत्येकं चीवरं चेतापयित्वा इत्थं नामं भिक्षुं प्रत्येकं प्रत्येकं चीवरेणाच्छादयि-स्यामः। तत्र च भिक्षुः पूर्व्व अप्रवारितो उपसंक्रमित्वा विकल्पमापद्येय साधु खो पुनस्तमायुष्मन् त्वं च भगिनि इमे हि प्रत्येक चीवर चेतापनेहि प्रत्येकं चीवरं चेतापयित्वा इत्थं नामं भिं प्रत्येकं चीवरेणा-च्छादेथ। एवं रूपेण वा एवं रूपेण वा उभौ पि सहितौ। एकेन कल्याणकामतामुपादाय प्रतिनिष्पन्ने चीवरे निस्सर्गिक पाचत्तिकम् ॥

10. भिक्षु खो पुनरुद्दिश्य अन्यतरो राजा वा राजभोग्यो वा दूतेन चीवरचे [19A] तापनानि प्रेषेय सो भिक्षुस्तेनोपसंक्रमित्वा तं भिक्षुमेवं वदेय इमानि खल्वार्यमुद्दिश्य इत्थन्नामेन राज्ञा च राज-भोग्येन वा दूतेन चीवरचेतापनानि प्रेषितानि तानि आर्यो प्रतिगृह्णातु। तेन भिक्षुणा सो दूतो एवमस्य वचनीयो न खो पुनरायुष्मन् क्षमते भिक्षुस्य चीवरे चेतापनानि प्रतिगृह्णीतुं। चीवरन्तु वयं प्रतिगृह्णामः कालेन समयेन कल्पिकं दीयमानं। एवमुक्तो सो दूतो तं भिक्षुमेव वादयन्ति। पुनरार्य केचिद्भिक्षुणां वैयापृत्यङ्करोति। आकांक्षमाणे[1] न भिक्षुणा सन्ता वैयापृत्यंकरं व्यपदिशितव्याः। आरामिका वा एते आयुष्मन् भिक्षुणा वैयापृत्यंकराये भिक्षुणां वैयापृत्यं करोन्ति। एवमुक्तो सो दूतो येन [19B] वैयाप्रत्यंकरास्तेनोपसंक्रमित्वा तन्वै-याप्रत्यंकरानेवं वदेय साधु खो पुन यूयमायुष्मन्तो वैयाप्रत्यंकरा इमे हि चीवरचेतापने हि चीवरं चेतापयित्वा इत्थं नाम भिक्षुं चीवरेणाच्छादेथ। कालेन समयेन कल्पिकेनानवद्येन सो च दूतो तान्वैयापृत्यंकरान् संज्ञापयित्वा येन सो भिक्षुस्तेनोपसंक्रमित्वा[1] भिक्षूमेव वदेय ये खलु[3] आर्येण वैयापृत्यंकरा व्यपदिष्टास्ते मया

1—Ms. आकांक्षमाणोन
2—Ms. adds नि
3—Ms. reads खति

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

संज्ञाप्तास्तामुपसंक्रमेयामि आच्छादयिष्यन्ति। ते चीवरेण कालेन समयेन कल्पिकेनानवद्यो न आकांक्षमाणेन भिक्षुणा चीवरान्विकेन ते वैयापृत्यकरास्तेनोपसंक्रमित्वा ते वैयापृत्यंकराः। सकृत द्वित्थि-खुत्तो त्रित्थुखुतो याचयितव्या विज्ञापयितव्याः। [20A] अथो आयुष्मन्तो भिक्षुस्य चीवरेण भिसकृत द्विक्खुत्तो त्रिक्खुत्तो चोदयन्तो विज्ञापयन्तो तं चीवरमभिनिष्पादेय इत्येतत्कुशलन्नोचेदभिनिष्पादेय चतुक्खुत्तो पञ्चखुत्तो षड्खुत्तो परमन्तेन भिक्षुणा तूष्णीं भूतेन उद्देशे स्थातव्यं। चतुक्खुत्तो पञ्चक्खुत्तो षड्क्खुत्तो परमं तूष्णीभूतो उद्देशे तिष्ठन्तो तं चीवरमभिनिष्पादेय इत्येतत्कुशलं नोचेदभिनिष्पा-देय तं दुत्तयन्तो वाच्यायमन्तो वातं चीवरमभिनिष्पादेय अभिनिष्पन्ने चीवरे निस्सर्गिक पाचत्तिकम् ॥ नो चेदभिनिष्पदेय येन सेतानि राज्ञा वा राजभोग्येन वा इतेन चीवरचेतापनानि प्रेषितानि। तत्र तेन भिक्षुणा स्वयं वागन्त व्यं। इतो वा प्रतिरूपो प्रेषयितव्यो यानि ख आयु [20B] ष्मन्त हि इत्थं नामं भिक्षूमुद्दिश्य इतेन चीवरचेतापनानि प्रेषितानि न ख तानि तस्य भिक्षुस्य किञ्चिदर्थम्करोन्ति। युञ्जन्ते यः यथैनं सकं धर्म्मा सो विप्रणधिशिष्यतीति इयमनुसामीची।

उद्दानं ॥ [1] दशाहं [2] विप्रवासो [3] अकाले च [4] प्रतिग्रहो [5] धोवना [6] याचना [7-8] चिवरसान्तरोत्तरं द्वे च [9] विकल्पेन [10] राजा च। प्रथमो वग्गः ॥

11. यो पुनभिक्षुः शुद्धकाणकानामेडकलोमानांन्नवं सन्थतं कारापेय निस्सर्गिक पाचत्तिकम् ॥

12. नवं सन्थतं भिक्षुणा कारापयमाणेनशुद्धकाणकानामेडक-लोमानां द्वे भागा आदयितव्यास्तृतीयो ओदातिकानां चतुत्थो गोचरिकाणां तदुत्तरिमादियेय निस्सर्गिक पाचत्तिकम्।

13. यो पुनभिक्षूः कौशेय मिश्राणामेडक [21A] लोमानान्नवं सन्थतं कारापेय निसर्गिक पाचत्तिकम् ॥

14. नवं सन्थतं भिक्षुणा कारापयमाणेन प्रकामं षड्वर्षाणि

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

धारयितव्यं । ततो च भिक्षुः प्रत्योत्तरेण पुराणे सन्थतं विसर्ज्जयित्वा वा अविसर्ज्जयित्वा वा अन्यन्नवसन्थतं कारापेय कल्याणकामतामुपादेय अन्यत्र[1] समुतीये निस्सर्गिक पाचत्तिकम् ।

15. नवं सन्थतं निषीदनं भिक्षुणा कारापयमाणेन, ततो पुराणसन्थतातो समन्तात्सुगतवितस्तिना भागो आदयितव्यो नवस्य दुव्वण्णीकरणाथ ततो च भिक्षुरनादाय नवसंत्थतं निषीदनं कारापेय निसर्ग्गिक पाचत्तिकम् ॥

16. भिक्षुस्य खो पुनरध्यानमाग्गे प्रतिपन्नस्य उत्पद्येअ एडकलोमानि आकांक्षमाणेन भिक्षुणा प्रतिगृह्णित [21B] व्यं ह्लिप्रतिगृत्वा सामं त्रियोजनपरमं हर्त्तव्यमन्ते अन्यस्मिहारके तदुत्तरिं हारेयमन्ते वा अमन्ते वा अन्यस्मिहारके निसर्गिक[2] पाचत्तिकम् ।

17. यो पुन भिक्षुरन्यातिकाये भिक्षुणीये एडकलोमानि धोवायेय वा रंजायेय वा । विजटापयेद्व[3] वा निस्सर्गिक पाचत्तिकम् ।

18. यो पुनभिक्षुः स्वहस्तं जातरूपरजतमुद्गृह्णयेय वा उद्गृह्णायेय अन्तमसतो इह निक्षिपेहीति वा वदेय । उपनिक्षिप्तं वा सादियेय निःस्सर्गिक पाचत्तिकम् ॥

19. यो पुनभिक्षुरनेकविधं क्रय विक्रयं व्यवहारं समापद्येय संय्यथीदं इमं क्रिण इतो क्रिण एत्तक सेत्तके क्रीणाहीति वा वदेय निःसर्गिक पाचत्तिकम् ॥

20. यो पुनभिक्षुरनेकविधं जातरूपरजतविक्र [22A] तिव्यवहारं समापद्येय निःसर्गिक पाचत्तिकम् ॥

उद्दानं । [11-12] शुद्धकालकानां द्वे भागा [13] कैशेयमिश्र [14] षड्वर्षाणि [15] निषीदनं [16] अध्वानमागो [17] विजटापेय[4] [18] स्वहस्तं [19] क्रयविक्रय [20] विक्रतिव्यवहारेण ॥द्वितीयो वगः ॥

1—Ms. adds नमत The Sarvastivādin text reads संघसम्मत्या pp. 497, *Journal Asiatique* 1913.

2—Ms. reads निशर्गिक 3—The Sarvāstivādin text reads विजटापयेद् वा. The Ms. reads विचटाये यथा.

4—Ms. reads विवटापेय.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

21. दशाहपरमं भिक्षुणा अतिरेकपात्रं धारयितव्यं तदुत्तरिं धारेय निःस्सर्गिक पाचत्तिकम् ॥

22. यो पुनभिक्षू उनपञ्चबन्धनबद्धेन पात्रेण अन्यं नवं पात्रं पर्यायेय इमातामुपादाय। तेन भिक्षुणा तं पात्रं भिक्षूपर्याये निःसरितव्यं। यो तहि भिक्षू पर्याये पात्रपर्यन्तो भवति। सो तस्य भिक्षुस्य अनुप्रदातव्यो। एवं ते आयुष्मान्पात्रो भारयितव्यो यावद्भेदन [निस्सर्गिक] पाचत्तिकम्।

23. यानि खो पुनरिमानि गिलानप्रतिपेषणीयानि भैष [22B] जानि भवन्ति। संय्यथीदं सपिस्तैलमधुफाणितं। एवं रूपाणि गिलानेन भिक्षुणामकृत्याभिगृहीतानि क्षमते। सप्ताहं सन्निधिकारं परिभुजितं। सन्तशेषन्निस्सरितव्यं। तदुत्तरितव्यं तदुत्तरिं खादेय वा भुंजेय वा सन्तशेषन्न[1] निस्सरेय निःस्सर्गिक पाचत्तिकम्।

24. यो पुनभिक्षुभिक्षुस्य चीवरं दत्त्वा यथादुष्तो दोषात्कुपितो अनादमानो आच्छान्देय वा आच्छान्दापेय वा आहर [ति] भिक्षुचीवरं न ते ददेमीति वा वदेय[2] निःसर्गिक पाचत्तिकम् ॥

25. मासो शेषो ग्रीष्माणोमिति भिक्षुणा वर्षाशाटिका चीवरपर्येषितव्यं अर्द्धमासो अवशिष्टोति कृत्वा मुषितव्यम् ॥ ततो च भिक्षुः प्रत्यांतरेण वर्षाशाटिका चीवरं पर्ये [23A] पेय कृत्वा वास्तायेय निः सर्गिक पाचत्तिकम्।

26. यो पुनभिक्षूः स्वयं याचिकाय सूत्रन्तन्तुवायेन चीवरं धुनायेय निस्सर्गिक पाचत्तिकम् ॥

27. भिक्षूं खो पुनरुद्दिश्य अन्यतरो गृहपतिर्व्वा गृहपतिपुत्रो वा तन्तुवायेन चीवरं धुनायेय ते एव भिक्षूः पूर्व्वे अप्रवारितो उपसंक्रमित्वा

1—Ms. reads सन्त आ शेषभु...

2—The Chinese Msg. has not got the phrase आहरति भिक्षुचीवरं न ते ददेमीति वा वदेय ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

विकल्पमापद्येय साधु खो पुनस्तमायुष्मन्निमं चीवरमायतं च करोहि विस्तृतं च करोहि सुवुत्तं[1] च करोहि। सुतच्छितं च करोहि सुविलिखितं च करोहि। अप्पेव नाम वयं पि तवकिञ्चिदेव मात्रामुपसंहरेम। माषकम्वा। माषकार्द्धम्वा पिण्डपात्रम्वा पिण्डपात्राहिम्वा। तत्र च सो भिक्षुरेवं वदित्वा न किञ्चिदेवमात्रामुपसंहरेय। माषकम्वा। माषका-[23B] र्द्धम्वा। पिण्डपात्रम्वा पिण्डपात्राहिम्वा। अ[2] भिनिष्पन्ने चीवरे निसर्गिक पाचत्तिकम् ॥

28. द[3] शाहानागतं खो पुनत्रेमासं कार्तिकी पौर्णमासी उत्पद्येय भिक्षूस्य आत्यायिकं चीवरमत्यायिकं मन्यमानो न भिक्षुणा प्रति-गृह्णितव्यं[4]। [24A] {प्रतिगृह्णित्वा यावन्चीवरदानकालसमयं निक्षि-पितव्यं। तदुत्तरिं निक्षिपेय निसर्गिक पाचत्तिकम्।

29. उपवर्ष खो पुनः त्रैमासं कार्तिकी पौर्णमासी भिक्षुचारण्यके शयनासने विहरन्ति। सभये सप्रतिभये। सशंक सम्मते। आकांक्ष-माणेन भिक्षुणा त्रयाणां चीवराणामन्यतरान्यतरं चीवरं मन्तरगृहे निक्षिपितव्यं। स्यात्तस्या भिक्षूस्य कोचिदेव प्रत्ययो तस्माच्चीवरा-द्विप्रवासाय षडाहपरमन्तेन} भिक्षुणा तस्माच्चीवराद्विप्रवसितव्यं। तदुत्तरिं विप्रवसेय अन्यत्र दीघीसमुतेये निस्सर्गिक पाचत्तिकम्।

30. यो पुनभिक्षू जानन् सांघिकां लाभं संघे परिणतमात्मनो परिणामेय निस्सर्गिक पाचत्तिकम् ॥

उद्दानं। [21] पात्र [22] बन्धनं [23] भैषज्ञ [24] माच्छेदो [25] वर्षाशाष्टिका [26-27] तन्तुवायेन द्वे [28] दशाहानागत [29] मुपवर्ष [30] परिणामनेन तृतीयो वगः ॥

उद्दिष्टाः। खो पुन [24B] रायुष्मन्तो त्रिंशन्निःसर्गिक पाचत्तिका धर्म्मास्तत्रायुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः द्वितीयम्पि

1—Pāli text सुवितत् 2—Ms. adds ह 3—Ms. reads स्ता

4—The porition within { } has been repeated in the Ms.; the better reading has been retained. The second copyist probably recopied something from the earlier Ms.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः। तृतीयम्पि आयुष्मन्तो पृच्छामि कच्चित्थ परिशुद्धाः। परिशुद्धात्रायुष्मन्तो यस्मात्तूष्णीमेवमेतं धारयामि।

V. THE NINETY-TWO PĀCATTIKA DHARMAS.

इमे खो पुनरायुष्मन्तो द्वानवतिं शुद्धपाचत्तिका धर्मा अन्वर्द्धमासं सूत्रे प्रातिमोक्षे उद्देशमागच्छन्ति।

1. संप्रजानमृषावादे पाचत्तिकम्।

2. ओमृष्यवादे पाचत्तिकम्।

3. भिक्षुपिशुन्ये पाचत्तिकम्।

4. यो पुनभिक्षू जानं संघस्याधोकरणानि। धर्म्मेण विनयेन विहितानि व्युपशान्तानि पुनः कर्म्माय उखोटेय इदं पुनः कर्म्मकर्त्तव्यं भविष्यतीति एतदेव प्रत्ययं कृत्वा अनन्यमिमन्तस्य भिक्षूस्य उखोटनं पाचत्तिकम्।

5. यो पुनभिक्षुरकल्पियकारो मातृग्रामस्य धर्मदेशेय उत्तरिच्छहि पञ्चाहि वाचाहि अन्यत्र विज्ञपुरुष पु [25A] द्गलेन पाचत्तिकम्।

6. यो पुनभिक्षूरनुपसंपन्नं पुद्गलं पदशो धर्म्मवाचेय पाचत्तिकम्।

7. यो पुनभिक्षुरनुपसंपन्नस्य पुद्गलस्य सन्तिके आत्मोपनायिकमुत्तरिमनुष्यधर्म्ममलमार्यज्ञानदलनं द्विशेषाधिगमम्प्रतिजानेय इति जानामि इति पश्यामीति भूमि तस्मिं पाचत्तिकम्॥

8. यो पुनभिक्षूर्ज्जानन् भिक्षूस्य दूथूल्लामापत्तिमनुपसंपन्नस्य पुद्गलस्य सन्तिके आरोचेय अन्यत्र कृतये प्रकाशनासम्मुतीये पाचत्तिकम्।

9. यो पुनभिक्षुर्ज्ञानसांघिके लाभे भाजीयमाने पूर्व्वे समनुजो भूत्वा पश्चात्खिया धर्म्ममापद्येय यथासंस्तुतमेवायुष्मन्तो यानं सांघिकं लाभं संघे परिणतं पुद्गलो पुद्गलस्य परिणामयतीति पाचत्तिकम्॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

10. यो पुनभिक्षूरन्वर्द्धमासं सूत्रे प्रातिमोक्षे उद्दिश्यमाने एवं वदेय किं पुनरायुष्मन्तो इमे हि क्षुद्राश्च क्षूद्रे हि [25B] शिक्षापदे हि उद्दिष्ते हि यावदेव भिक्षुणां कौकृत्याय विघाताय[1] विलेखाय संवर्त्ततीति शिक्षाविगर्हणपाचत्तिकम् ॥

उद्दानम् । [1] मृषा [2] ओमृष्य [3] पेशुन्य [4] उखोटन [5] धर्म्मेदेशना [6] पदशो [7] विशेषण [8] मारोचना [9] यथा-संस्तुत [10] विगर्हणेन ॥ प्रथमो वग्गः ॥

11. बीजग्रामभूतग्राम पातापनके[2] पाचत्तिकम् ॥

12. अन्यवाद विहिंसनके पाचत्तिकम् ॥

13. ओध्यायन क्षीयनके पाचत्तिकम् ॥

14. [3]यो पुनभिक्षूः सांघिके भिक्षुविहारे अद्यवकाशे मञ्चम्वा पीठम्वा विशिकरंम्वा चतुरग्रकं वा कुच्चम्वा बिम्बोहनम्वा प्रज्ञायेयत्वा वा । प्रज्ञायायत्वा वा ततो प्रक्रमन्तो न उद्धरेय वा न उद्धरायेय वा अनामन्त्रयित्वा वा प्रक्रमेय पाचत्तिकम् ॥

15. यो पुनभिक्षूः सांघिके भिक्षुविहारे अन्तोशय्यां प्रज्ञायेत्वा प्रज्ञयायेत्वा [वा] । ततो प्रक्रमन्तो न उद्धरेय वा न उद्धरायेय वा [26 A] अनामन्त्रयित्वा वा प्रक्रमेय पाचत्तिकम् ॥

16. यो पुनभिक्षू भिक्षूस्य दुष्तो दुषान्कुपितो अनात्तमनो सांघिका भिक्षुविहारा भिक्षून्निकढेय वा निकढ्ढायेअ वा अन्तमसतो निहि भिक्षूति वा वादेय पाचत्तिकम् ॥

17. यो पुनभिक्षु सांघिके भिक्षूविहारे जानन्भिक्षूणां पूर्व्वप्रज्ञप्ता हि शय्यां हि पश्चादगत्वा मध्ये शय्यां प्रज्ञायेय यस्योद्वहिष्यति सो

1—This reading is missing in the Sarvāstivādin text; the Pāli text reads विहेसाय.

2—The Sarvāstivādin text reads पातनात्; the Pāli text reads पातव्यताय. Pac. IX p. 34 (Oldenberg.)

3—Compare with the Chinese Msg.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

प्रक्रमिष्यतीति एतदेव प्रत्ययं कृत्वा अनन्यमिमं तस्य भिक्षूस्य उद्वाहन पाचत्तिकम् ॥

18. यो पुनभिक्षूः सांघिके भिक्षूविहारोपरि वैहायसं कुटिकाये आहत्य पादके मंचे वा पीठे वा अभिनिषीदेय वा अभिनिपद्येय वा पाचत्तिकम् ॥

19. यो पुनभिक्षूज्जानन्सप्राणकेनोदकेन तृणं वा मृत्तिकां वा सिंचेय वा सिंचायेय वा पाचत्तिकम् ॥

20. महल्लकं भिक्षुणा विहारं छादापयमानेन यावद्वारकोषा अगलप्रतिष्ठान [26B] मालोकसन्धिपरिकर्म्ममुपादाय द्वे वा त्रयो वा च्छादनपर्याया अधिष्ठिहितव्याः। अल्पहरिते स्थितेन तदुत्तरिं अधिष्ठिहेय अल्पहरिते स्थितोपि पाचत्तिकम् ॥

उद्दानं [11] बीजं [12] अन्यवादं [13] उध्यायनं [14] मञ्च [15] सय्या [16] निकट्टनं [17] पूर्व्वोपगतं [18] वैहायसं [19] उदक [20] च्छादनेन ॥ द्वितीयोवगः ॥

21. यो पुनभिक्षू असम्मतो भिक्षुणीमोवदेय पाचत्तिकम् ।

22. सम्मतोवापि भिक्षूः भिक्षूणीमोवदेय विकाले अस्तंगते सूये अनूहते अरुणे पाचत्तिकम् ॥

23. यो पुनभिक्षू ओवादप्रेक्षो भिक्षुणी उपाश्रयमुपसंक्रामेय सन्तं भिक्षूमनामन्त्रयित्वा अन्यत्र समये पाचत्तिकम् ॥

तत्रायं समयो गिलानाभिक्षुणी ओवदितव्याः अनुशासितव्याः भवति अयमत्रसमयो ॥

24. यो पुनभिक्षू भिक्षुमैवं वदेय आमिषहेतो आयुष्मन्भिक्षू[1] भिक्षूणीं ओवदतीति पाचत्तिकम् ॥

25. यो पुनभिक्षू भि [27A] क्षूणीय सार्धमेको एकाएरहो निषद्यां कल्पेय पाचत्तिकम् ॥

1.—Ms. गायुष्मन्

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

26. यो पुनभिक्षू भिक्षुणीयसार्धं संविधाय अध्वानमार्गं प्रतिपद्येय अन्तमसतो ग्रामान्तरं पि अन्यत्रसमये पाचत्तिकम् ॥ तत्रायं समयो मार्गो भवति। सभयो सप्रतिभयो सासंकसम्मंतो अयमत्र समयो।

27. यो पुनभिक्षु भिक्षुणीयसार्धं संविधाय एकनावां अभिरुहेय उर्द्धगामिनीम्वा अधोगामिनीम्वा अन्यत्र तिर्यात्तरणाय पाचत्तिकम् ॥

28. यो पुनभिक्षू अन्यातिकाये भिक्षुणीये चीवरं दद्यादन्यत्र पतुन्तकेन[1] पाचत्तिकम् ॥

29. यो पुनभिक्षुरन्यातिकाये भिक्षुणीये चीवरं सीवेय वा सीवायेय वा पाचत्तिकम् ॥

30. यो पुनभिक्षूर्जानन्भिक्षुणी परिपाचितं पिन्डपात्रं परिभुंजेय अन्यत्र पूर्व्वेगृही[2] समारम्भे पाचत्तिकम् ॥

उद्यानं ॥ [21] असम्मतो [22] सम्मतोरपि [23] ओवादो [24] आमिषं [25] निषद्याच [26] अध्वानमार्गो [27] नावा च [28] [27B] देति। [29] सीवेति [30] परिपाचनेन ॥ तृतीयो वर्गः ॥

31. एकाहपरमं भिक्षुणा अगिलानेन अवसथपिन्डपात्रो[3] परिभुंञ्जितव्या तदुत्तरिं परिभुंज्ये पाचत्तिकम् ॥

32. परम्पराभोजने अन्यत्र समये पाचत्तिकम्।

[4]तत्रायं समयो। गिलानसमयो चीवरदानकालसमयो अयमत्र समयो[5]।

33. यो पुनभिक्षुर्भुंजावीप्रवारितो उत्थितो आसनातो अनतिरिक्तं

1—Pāli text reads पारिवत्तका (exchange).

2—Chinese Msg. reads here "old donor".

3—Ms. reads अवशथपिन्डपात्रो.

4—The Sarvāstivādin reads तत्रायं समयो गिलानसमयो चीवरदानसमयो. The Pāli text reads गिलानसमयो चीवरदानसमयो चीवरकारसमयो.

5—Superfluous reading तत्रायं समयो गिलानसमयो पाचत्तिकम् in the Ms.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कृतं खादनीयं वा भोजनीयं वा खादेय वा भुंञ्जेय वा पाचत्तिकम् ॥

34. यो पुनभिक्षुजानन्भिक्षू भुक्ताविप्रवारितमुत्थितमासनातो आसादनापेक्षो अनतिरिक्तकृतेन खादनीयेन वा भोजनीयेन वा उपनिमन्त्रेय एहि भिक्षु खादार्हं भुंजाहीति वा वदेय भुक्तस्मिं पाचत्तिकम् ॥

35. यो पुनभिक्षूरदिन्नमप्रतिग्राहितं मुखद्वारिकमाहारमाहारेय अन्यत्रोदक दन्तपोणे पाचत्तिकम् ॥

36. [28A] विकालाभोजने पाचत्तिकम् ।

37. सन्निधेकार भोजने पाचत्तिकम् ।

38. भिक्षुं खो पुनः कूले हि उपसंक्रान्तं प्रवारेत्सुपूवेहि वा मन्थे हि वा तथा प्रवारितेन भिक्षुणा यावन्त्रिपात्रपूरपरमं ततो प्रतिगृह्णितव्यं । प्रतिगृह्णित्वा वहिर्द्वानीहरितव्यं वहिर्द्वानीहरित्वा अगिलानके हि भिक्षू हि सार्धं सम्विभजित्वा खादितव्यं भुंजितव्यं तदुत्तरिं प्रतिगृह्णित्वा वहिर्द्वानीहरित्वा अगिलानके हि भिक्षू हि सार्द्धं सम्विभजित्वा वा असंविभजित्वा वा खादेव वा भुंजेय वा पाचत्तिकम् ।

39. यानि खो पुनरिमानि प्रणीतसम्मतानि भोजनानि भवन्ति संय्यथीदं सर्पिस्तिलं मधुफाणितं दुग्धं दधि मत्स्यं मासं यो पुनभिक्षूरेवं रूपाणि प्रणीतसम्मतानि भोजनानि आत्मात्वाय अगिलानो कूले हि विज्ञेपेत्वा वा विज्ञापयेत्वा वा खादेय वा भुंजेय पाचत्तिकम् ।

40. गणभोजने अन्यत्रसमये पाच [28B] त्तिकं ।

तत्रायं समयो गिलानसमयो चीवरदानकालसमयो अध्वानगमनसमयो नावाभिरोहणसमयो महासमयो श्रवणभुक्तं अयमत्रसमयो ।

उद्यानं । [31] आवसथो [32] परम्परा [33] प्रवारणा [34] आसदना [35] अदिन्नं [36] विकालं [37] संनिधिं [38] मन्थां [39] विज्ञप्तिः [40] गणभोजनेन ॥ चतुर्थो वर्गः ॥

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

41. यो पुनर्भिक्षुरात्मार्थाय अगिलानो क्षोभिस्मिन्वितापना प्रोक्तो। तृणं वा काष्ठं वा गोमयं वा सकलिकांवा ओषम्वा संकारम्वा आदपहेय वा आदहायेय वा अन्यत्र समये पाचत्तिकम्।

42. यो पुनर्भिक्षुरनुपसंपन्नेन पुद्गलेन सार्द्धं उत्तरि द्विरात्रं त्रिरात्रं वा सहगारशय्यां कल्पेय पाचत्तिकम्।

43. यो पुनर्भिक्षुर्भिक्षूणां कर्मणाच्छन्दन्दत्वा पश्चाद्दुष्टो दोषान्कुपितो अनात्तमनो एवं वदेय अदिन्नं मे च्छन्दो दुर्दिन्नो मे च्छन्दो अकृतान्येतानि कर्माणि दुष्कृतान्येतानि कर्माणि नाहमे [29A] तेषां कर्मणाच्छन्दं देमीति वदेय पाचत्तिकम्॥

44. यो पुनभिक्षू भिक्षूमेवं वदेय एहि त्वं मायुष्मान्ग्रामं पिन्डाय प्रविशिष्यामः। अहञ्च ते तत्र किञ्चिदापयिष्यं। सो तत्र तस्य किञ्चिदापयित्वा वा अदापयित्वा वा पश्चादुद्योजनं प्रक्षो एवं वदेय गच्छ त्वमायुष्मन्नमे त्वया सार्धं फासु[1] भवति कथाय वा निषद्याय वा। एकस्यै च मम फासु भवति। कथाय वा निषद्याय वा एतदेव प्रत्ययं कृत्वा अनन्यमिमन्तस्य भिक्षुस्य उद्योजन पाचत्तिकम्।

45. यो पुनभिक्षु भिक्षूनेवं वदेय तथाहमायुष्मान्तो भगवता धर्म्मन्देशितमाजानामि यथा ये इमे अन्तरायिका धर्मा उक्ता भगवता तान्प्रतिसेवतो वा नालमन्तरायाय। सो भिक्षू भिक्षू हि एवमस्य वचनीयो मा आयुष्मन्नेवम्वद मा भगवन्तम् आचक्ष। असता बुद्धयाही तेन अन्तरायिका एवमायुष्म [29B] न्धर्माः समाना अन्तरायिका धर्मा उक्ता भगवता अलञ्च पुनस्तान् प्रतिसेवतो[2] अन्तरायाय। एवं च सो भिक्षु भिक्षुहि वुच्यमानो तं वस्तुं प्रतिनिस्सरेय इत्येतं कुशलान्नो च प्रतिनिस्सरेय। सो भिक्षु भिक्षुहि यावन्तृतीयकं समनुग्राहितव्यो समनुभाषितव्यो तस्य वस्तुस्य प्रतिनिस्सगाय यावन्तृतीयकं समनुग्राहियमाणो वा समनुभाषियमाणो वा तं वस्तुं प्रतिनिस्सरेय इत्येतं

1—Ms. reads वसु. The Pāli text reads फासु होति.

2—Ms. reads प्रतिषेवतो.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

कुशलं नो च प्रतिनिःसरेय सो भिक्षूः समग्रेण संघेन उक्षिपितव्यो इमं तस्य भिक्षुस्य उक्षेपण पाचत्तिकम् ॥

46. यो पुन भिक्षुर्जानन्भिक्षु तथा उक्षिप्तं समग्रेण संघेन धर्मेण विनयेन यथावादिं तथा कारितां पापिकां दृष्टिं अप्रतिनिस्सरणं तं अकृतानुधर्म्मं सभुंजेय वा संवसेय वा सहगारशय्याम्वा कल्पेय पाचत्तिकम् ।

47. श्रमणुद्देशोपि चेदेवं वदेयं त [30A] थाहमायुष्मान्तो भगवता धर्मदेशितमाजानामि यथा ये इमे अन्तरायिका कामा उक्ता भगवता तान्प्रतिसेवतो नालमन्तरायाय सो श्रमणुद्देशो भिक्षूहि एवमस्य वचनीयो मा आयुष्मन् श्रमणुद्देश एवम्वद मा भगवन्तमस्याचक्ष असतादुद्गृहीतेन अन्तरायिका एवायुष्मन्श्रमणुद्देशकामाः । समाना अन्तरायिकाः कामा उक्ता भगवता अलं च पुनस्तान्प्रतिसेवतो अन्तरायाय । एवञ्च सो श्रमणुद्देशो भिक्षू हि वुच्यमानो तं वस्तु प्रतिनिःसरेय इत्येतं कुशलन्नो च प्रतिनिस्सरेयस्तो श्रमणुद्देशो भिक्षूहि यावन्तृतीयकं समनुग्राहितव्यो समनुभाषितव्यो तस्य वस्तुस्य प्रतिनिःस्सगाय यावन्तृतीयकं समनुग्राहियमाणो वा समनुभाषियमाणो वा तं वस्तुं प्रतिनिःसरेय इत्येतं कुशलन्नो च प्रतिनिःसरेयः [30B] सो श्रमणुद्देशो भिक्षू हि नाशयितव्यो अद्यदग्रेण ते आयुष्मन् श्रमणुद्देश न चैव सो भगवानस्तथागतो(?)र्हन्सम्यक् संबुद्धे शास्ताव्यपदिशितव्यो यं पि च दानि लभसि भिक्षूर्हि सार्धं द्विरात्रं वा त्रिरात्रम्वा सहगारशय्यां सायिते अद्यदग्रेण नास्ति गच्छनस्य चल प्रपलाहि । यो पुनभिक्षू जानन्तथार्मशितं श्रमणुद्देशं यथावादीन्तथा कारितां[1] पापिकां दृष्टिमप्रतिनिःसरन्तं अकृतानुधर्म्म उपस्थाये वा उपलायेय वा संभुंजेय वा संवसेय वा सहगारशय्यां वा कल्पेय पाचत्तिकम् ।

48. नवचीवरलाभिना भिक्षुणा त्रयाणाम्दुवर्णीकरणानामन्यतरान्यतरं दुर्व्वर्णीकरणसादयितव्यं । नीलम्वा कर्दमम्वा कालश्यामन्वा ततो च भिक्षूरनादाय नवं चीवरपरिभुंजेय पाचत्तिकम् ।

1—Ms. reads कारीन्ता.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

49. यो पुनर्भिक्षूरन्यत्र अध्यारामे वा अध्यावसथे वा। रतनम्वा [31A] रतनसंमतम्वा उद्गृह्णाय वा उद्गृह्णायेय वा पाचत्तिकम्। आकांक्षमाणेन भिक्षुणा रतनम्वा रतनसम्मतम्वा। अध्यारामे वा अध्यावसथे वा उद्गृह्णीतव्यं वा उद्गृह्णायितव्यं वा यस्य भविष्यति सो हरिष्यतीति एतदेवप्रत्ययं कृत्वा अनन्यमियमत्रसामीची।

50. अन्वर्द्धमासं स्नानमुक्तं भगवता अन्यत्रसमये पाचत्तिकम्।

तत्रायं समयो द्व्यर्द्धो मासो शेषे ग्रीष्माणाम्वर्षाणां च पुरिमो मासो इत्येते अर्धातीय मासः परिदाहकालसमयो अध्वान-गमनकालसमयो[1] गिलानसमयो कर्मसमयो वातसमयो वृष्टिसमयो अयमत्रसमयोः।

उद्यानम्॥ [41] क्षोभिः [42] सहगार [43] च्छन्दम् [44] उद्योजना [45-46-47] त्रयोऽन्तरायिका [48] अकृतकल्पम् [49] रतनं [50] स्नानेन॥ पञ्चमो वग्गः॥

51. यो पुनभिक्षु जानिअ[2] प्राणकमुदकं परिभुंजेय पाचत्तिकम्।

52. यो पुनभिक्षू अवेलक [31B] स्य वा अवेलिकाय वा परिव्राजकस्य वा परिव्राजकाये वा स्वहस्तं खादनीयम्वा भोजनीयम्वा दद्यात्पाचत्तिकम्॥

53. यो पुनभिक्षू जानन्तं भोजनीये कुले अनुपखज्जासने[3] निषद्यां कल्पेय पाचत्तिकम्॥

54. यो पुनभिक्षु जनिअ भोजनीये कुले प्रतिच्छन्नासने निषद्यां कल्पेय पाचत्तिकम्॥

55. यो पुनभिक्षुरुद्यक्तां से[4] नाम्दर्शनाय गच्छेय पाचत्तिकम्।

1—Ms. adds a superfluous समयो.

2—Pāli text reads जानम्.

3—Sarvāstivādin text reads अनुप्रस्काद्यासने; the Pāli text reads अनुपखज्जासने.

4.—Ms. reads शे.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

56. स्यात्तस्य भिक्षुस्य क्वचिदेव[1] प्रत्ययोसनायाङ्गमनाय द्वि-[रा] त्रम्वा त्रिरात्रम्वा तेन भिक्षुणासेनायां वसितव्यं तदुत्तरीं वसेय[2] पाचत्तिकम् ॥

57. तत्रापि च भिक्षु द्विरात्रम्वा त्रिरात्रम्वा सेनायां वसमानो आयूहिकम्वा नियूहिकंम्वा अनेक व्यूह[3]म्वा ध्वजाम्वा शीर्षम्वा दर्शनाय गच्छेय पाचत्तिकम् ॥

58. [4]यो पुनभिक्षु भिक्षुं प्रहरेय पाचत्तिकम् ।

59. यो पुनभिक्षु भिक्षुस्य तलशक्तिकामावर्जेय पाचत्तिकम् ॥

60. यो पुनर्भिक्षु जानन् भिक्षूस्य दुस्थूलामापत्तिं कृ [32A] तमव्याचीर्णां च्छादेय सो न परेषामारोचेय किन्ति सेमापरे जानन्नेति अवद्य प्रतिच्छादने पाचत्तिकम् ।

उद्यानं ॥ [51] सप्राणकम् [52] अवेलको [53] अनुपखज्जं । [54] प्रतिछन्नासनं [55-56-57] सेनायां [58] प्रहरति [59] तल-शक्तिका [60] प्रतिच्छादनेन ॥ षष्ठो वग्गः ॥

61.[5] यो पुनभिक्षु संचिन्त्य तिर्यग्योनिगतं प्राणिनं जीविताद्व्यपरोपेय पाचत्तिकम् ।

62. यो पुनभिक्षु भिक्षुस्य संचिन्त्य कौकृत्यमुपसंहरेय किन्तिस मुहूर्त्तम्पि अफासु भवेदिति पाचत्तिकम् ॥

1—Ms. reads कोचिदेव 2—Ms. reads वशेय 3—Pāli text reads—dvirattatirattam ce bhikhu senāya vasamāno nyyodhikaṃ vā balaggam vā senābyūham vā anīkadassanaṃ vā gaccheyya, pācittiyan ti. The Sarvāstivādin text reads—dvirātra paramaṃ ced bhikṣuh senāyām vasaty udyuthikam senāṃ darçanāya mad dhavajāgram vā balāgram vā anika-darçanam vā pātyantikā. *Journal Asiatique* Nov.-Dec. 1913 p. 512.

4. No. 58 Chinese Msg. has "when he is angry and displeased."

5—No. 61 Chinese Msg. has no reference to तिर्यग्योनि.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

63.[1] यो पुनर्भिक्षू भिक्षूस्य वा भिक्षुणीये वा श्रामणेरस्ये वा श्रामणेरीये वा शिक्षमाणाये वा चीवरम्दत्वा अप्रत्युद्धरेय परिभुंजेय अप्रत्युद्धारपरिभोगे पाचत्तिकम् ॥

64. यो पुनभिक्षू भिक्षूस्य पात्रिं वा चीवरं वा निषीदनं वा सूचीविग्रहम्वा अपनिहेयम्वा अपनिहायेय वा अन्तमसतो[2] हास्याश्चापि पाचत्तिकम् ॥

65. यो पुनभिक्षू भिक्षूं भीषेय पाचत्तिकम्

66. उदके [32B] हस्तसम्मर्दनात् पाचत्तिकम् ॥

67. अङ्गलिप्रचोदनात् पाचत्तिकम् ॥

68. यो पुनभिक्षू मातृग्रामेण सार्द्धं संविधाय अध्वानमार्गं प्रतिपद्येत् अन्तमसतो ग्रामान्तरं पि पाचत्तिकम् ॥

69. यो पुनर्भिक्षू मातृग्रामेण सार्द्धं सहगारशय्यां कल्पेय पाचत्तिकम् ॥

70. यो पुनर्भिक्षू मातृग्रामेण सार्द्धं एको एकायरहो निषद्यां कल्पेय पाचत्तिकम् ॥

उद्यानम् । [61] संचिन्त्य [62] कौकृत्य 63] मप्रत्युद्धरित्य [64] कापनिहेय [65] भिषेय [66] उदके [67] अंगुली [68] संविधाय [69] सहगार [70] निषद्याय ॥ सप्तमो वग्गः ॥

71. यो पुनर्भिक्षू जानन्तं उनविंशतिवर्षं पुद्गलं भिक्षु उपसंपादेय सो च पुद्गलो अनुपसंपन्नो ते च भिक्षू गार्ह्या इमंस्तथा भिक्षुणागर्हणं पाचत्तिकम् ॥

72. यो पुनर्भिक्षू जानन्स्तैन्यसार्धेन सार्धं संविधाय अध्वानमार्गं प्रतिपद्येय अन्तमसतो ग्रामान्तरं पि पाचत्तिकम् ।

1—No. 63 Chinese Msg. does not mention the specific five types of disciples.

2.—Ms. reads अन्तमशतो.

CC-0. Public Domain. Vipin Kumar Collection, Deoband

Digitized by Madhuban Trust

73. यो पुनर्भिक्षू स्वहस्तपृथ्वीम् खनेय वा [33A] खनायेय वा अन्तमसतो इह खनेहीति एवं वदेय पाचत्तिकम् ॥

74. चातुर्मासिकं भिक्षुणा प्रत्येक प्रवारणा सादयितव्या तदुत्तरिं सादियेय अन्यत्र पुनः प्रवारणाये अन्यत्र यावज्जीविकाये पाचत्तिकम् ॥

